सूक्ष्मचूर्णं लवङ्गस्य तां वटीमवधूलयेत् ॥
दन्तस्पर्शो यथा न स्यात्तथा तामम्भसा गिलेत् ।
ताम्बूलं भक्षयेत् पश्चाच्छाकाम्ललवणांस्त्यजेत् ॥
श्रममातपमध्वानं विशेषात् स्त्रीनिषेवणम् ॥
इति कर्पूररसः ॥ १ ॥
पारदष्टङ्कमानः स्यात् खदिरष्टङ्कसंमितः ।
आकारकरभश्चापि ग्राह्यष्टङ्कद्वयोन्मितः ॥
टङ्कत्रयमितं चौद्रं खल्ले सर्व्वं विनिःक्षिपेत् ।
संमर्द्य तस्य सर्व्वस्य कुर्य्यात् सप्त वटीर्भिषक् ॥
स रोगी भक्षयेत् प्रातरेकैकामम्बुना वटीम् ।
वर्जयेदम्ललवणौ फिरङ्गस्तस्य नश्यति ॥
इति सप्तशालिकावटी ॥ २ ॥
पारदः कर्षमात्रः स्यात्तावदेव हि गन्धकः ।
तण्डुला अक्षमात्राः स्युस्तेषां कुर्य्याच्च कज्ज-
लीम् ॥
तस्याः सप्त वटीः कुर्य्यात्ताभिर्धूमं प्रयोजयेत् ।
दिनानि सप्त तेन स्यात् फिरङ्गान्तो न संशयः ॥
इति धूमप्रयोगः ॥ ३ ॥
पीतपुष्पबलापत्ररसैष्टङ्कमितं रसम् ।
हस्ताभ्यां मर्द्दयेत्तावत् यावत् स्तो न दृश्यते ॥
ततः संस्वेदयेद्धस्तादेवं वासरसप्तकम् ।
त्यजेल्लवणमम्लञ्च फिरङ्गस्तेन नश्यति ॥ ४ ॥
चूर्णयेन्निम्बपत्राणि पथ्यां निम्बाष्टमांशिकाम् ।
धात्रीञ्च तावतीं रात्रिं निम्बषोड़शभागिकाम् ॥
शाणमानमिदं चूर्णमश्नीयादम्भसा सह ।
फिरङ्गं नाशयत्येव बाह्यमाभ्यन्तरं तथा ॥ ५ ॥
तोपचीनिभवं चूर्णं शाणमानं समाक्षिकम् ।
फिरङ्गव्याधिनाशाय भक्षयेल्लवणं त्यजेत् ॥
लवणं यदि वा त्यक्तुं न शक्नोति तदा जनः ।
सैन्धवं स हि भुञ्जीत मधुरोपरसं हि तत् ॥६॥
अर्द्धकर्षमितं सूतं कुरण्टकरसैः सह ।
खल्ले विमर्द्दयेत्तत्र पलार्द्धं गुग्गुलुं क्षिपेत् ॥
तत्राकंकरभं कुष्ठं त्रिफलाञ्च पृथक् पृथक् ।
अर्द्धकर्षमितं सर्व्वं चूर्णयित्वा तु निःक्षिपेत् ॥
तत् सर्व्वं मधुसर्पिर्भ्यां द्विपलाभ्यां पृथक् पृथक् ।
मर्द्दयेदथ तत् खादेदर्द्धकर्षमितं रसम् ॥
व्रणः फिरङ्गरोगोत्थस्तस्यावश्यं विनश्यति ।
अल्पोऽपि चिरजातोऽपि प्रशाम्यति महाव्रणः ॥
एतद्भक्षयतः शोथो मुखस्य च न जायते ।
वर्जयेदत्र लवणमेकविंशतिवासरान् ॥ ७ ॥
इति फिरङ्गाधिकारः ।" इति भावप्रकाशः ॥

फिरङ्गरोटी, स्त्री, (फिरङ्गप्रिया रोटी । फिर-ङ्गाणां रोटीति वा ।) रोटिकाविशेषः । पाओरोटी इति पाँउरुटि इति च भाषा । सा तु तालस्याथवा खर्ज्जूरस्य रसेन मधुरिकाजलेन वा मिश्रितां गोधूमकणिकामधिककालमुत्तमं संमर्द्य गोलाकारं स्थूलं स्थूलं निर्म्माय तन्दूरपाकेन निष्पादिता भवति । इति पाकराजेश्वरः ॥

फिरङ्गिणी, स्त्री, (फिरङ्गदेशो जन्मस्थानत्वेनास्त्यस्या इति । फिरङ्ग + इनि । ङीप् ।) फिरङ्गदेशोद्भवनारी । यथा,—
"गन्धरोगः फिरङ्गोऽयं जायते देहिनां ध्रुवम् ।
फिरङ्गिणोऽतिसंसर्गात् फिरङ्गिण्याः प्रसङ्गतः ॥"
इति भावप्रकाशः ॥

फिरङ्गी [न्] पुं, (फिरङ्ग + इनिः ।) फिरङ्गदेशोद्भवपुरुषः । अस्य प्रमाणं पूर्व्वशब्दे द्रष्टव्यम् ॥

फुः, पुं, मन्त्रकम् । तुच्छवाक्यम् । इति विश्वः ॥

फुकः, पुं, (फुनाव्यक्तवाक्येन कायति शब्दायते इति । फु + कै + क ।) पक्षी । इति शब्दचन्द्रिका ॥

फुटः, त्रि, (स्फुटतीति । स्फुट + कः । पृषोदरादित्वात् साधुः ।) सर्पफणा । इति हेमचन्द्रः । ४ । ३८१ ॥

फु(फू)त्, व्य, अनुकरणशब्दः । इति फुत्कारशब्ददर्शनात् । (यथा, "बालः पयसा दग्धो दध्यपि फुत्कृत्य भक्षयति ।" इति प्राञ्चः ॥) तुच्छभाषणम् । इति केचित् ॥

फुत्करः, पुं, (फुदित्यव्यक्तशब्दं करोतीति । कृ + टः ।) अग्निः । इति शब्दचन्द्रिका ॥

फुत्कारः, पुं, (कृ + भावे घञ् । फुदित्यव्यक्तशब्दस्य कारः करणम् ।) फुत्करणम् । फु इति फुँक् इति च भाषा । फुत्कारवति पावके आहुतिनिषेधो यथा, तिथ्यादितत्त्वे ।
"अल्पे रूक्षे सस्फुलिङ्गे वामावर्त्ते भयानके ।
आर्द्रकाष्ठैः समुत्पन्ने फुत्कारवति पावके ॥
कृष्णार्चिषि सुदुर्गन्धे तथा लिहति मेदिनीम् ।
आहुतिं जुहुयाद्यस्तु तस्य नाशो भवेद्-
ध्रुवम् ॥"

फुत्कृतिः, स्त्री, (फुदित्यव्यक्तशब्दस्य कृतिः करणम् ।) फुत्कारः । यथा, काव्यचन्द्रिका ।
"स्फूर्ज्जत्फुत्कृतिभीतिसम्भ्रमचमत्कारस्फुरत्-
सम्भ्रमा ॥"

फुप्फुसः, पुं, पुप्फुसः । कोष्ठविशेषः । स च हृदयनाड़िकासंलग्नाशयविशेषः । फ्यापड़ा फुल्का कापासे इति च लोके । इति सुश्रुतः ॥ यथा,—
"स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च ।
हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते ॥"
इति माधवकरः ।
अस्य व्याख्या । "आमस्य स्थानं आमाशयः । नाभेरूर्द्धम् । अग्नेः स्थानं पच्यमानाशयः नाभिमध्यम् । पक्वस्य स्थानं पक्वाशयः नाभेरधः । मूत्रस्य स्थानं वस्तिः । रुधिरस्य स्थानं यकृत्प्लीहानौ । हृत् हृदयं रसुरसपाकमलवद्द्रयः शोणितमलस्तञ्च उण्डुकः स चान्त्रदेशे व्यवस्थितः पुरीषाधानम् । फुप्फुसः हृदयस्य वामपार्श्वे फुप्फुस इति ख्यातः ।" इति विजयरक्षितः ॥ (यथा च ।
"तद्वामे फुप्फुसः प्लीहा दक्षिणाङ्गे यकृत्तथा ।
उदानवायोराधारः फुप्फुसः प्रोच्यते बुधैः ॥"
इति पूर्व्वखण्डे पञ्चमेऽध्याये शार्ङ्गधरेणोक्तम् ॥)

फुल्तिः, स्त्री, (फल + क्तिन् । "ति च ।" ७।४।८९। इति अत उत् ।) फलनम् । इति मुग्धबोधव्याकरणम् ॥

फुल्ल, विकासे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) ह्रस्वी । लदयान्तः । विकास इह कस ज गताविति दन्त्यान्तस्य घञि रूपम् । विपूर्व्वत्वेनार्थान्तरवाचितया विकसनमित्यर्थः । फुल्लति मल्लीकलिका । इति दुर्गादासः ॥

फुल्लः, त्रि, (फुल्लतीति । फुल्ल + अच् । यद्वा, फलतीति । ञि फला विशरणे + क्तः । "आदितश्च ।" ७।२।१६ । इति इड़भावः । "ति च ।" ७ । ४ । ८९ । इति उत्वम् । "अनुपसर्गात् । फुल्लक्षीवेति ।" ८।२।५५। इति निष्ठा तस्य लः ।) विकसितः । इत्यमरः । २।४।८ ॥ (यथा, महाभारते । १ । १२८ । ४१ ।
"जलञ्च शुशुभे च्छन्नं फुल्लैर्जलरुहैस्तथा ॥") पुष्पम् । फुल इति भाषा । यथा,—
"श्रीपञ्चम्यां श्रियं देवीं फुल्लैः संपूजयेत् सदा ॥"
इति कालिकापुराणम् ॥

फुल्लदाम, [न्] क्ली, (फुल्लानां पुष्पाणां दाम इव ।) छन्दोभेदः । यथा,—
"मो गौ नौ तौ गौ शरहयतुरगैः फुल्लदाम
प्रसिद्धम् ॥"
उदाहरणं यथा,—
"शश्वल्लोकानां प्रकटितकदनं ध्वस्तमालोक्य कंसं
हृष्यच्चेतोभिस्त्रिदिववसतिभिर्व्योमसंस्थैर्वि-
सृष्टम् ।
मुग्धामोदेन स्थगितदशदिशाभोगमाहूतभृङ्गं
मौलौ दैत्यारेर्न्यपतदसुमं स्वस्तरोः फुल्लदाम ॥"
इति छन्दोमञ्जरी ॥

फुल्लफालः, पुं, (फुल्लं फलतीति । फल + अण् ।) शूर्पवातः । इति त्रिकाण्डशेषः ॥

फुल्लरीकः, पुं, (फल + "फर्फरीकादयश्च ।" उणा० ४ । २० । इति ईकन्प्रत्ययेन निपातनात् साधुः ।) देशः । सर्पः । इति संक्षिप्तसारोणादिवृत्तिः ॥

फुल्ललोचनः, पुं, (फुल्ले विकसिते लोचने यस्य ।) मृगविशेषः । इति शब्दचन्द्रिका ॥ प्रफुल्लनेत्रयुक्ते, त्रि ॥

फुल्लिः, स्त्री, विकाशः । इड्धातुकथने तिङ्वत्तिङ् वा इति संक्षिप्तसारसूत्रात् भावे इङ्प्रत्ययेन निष्पन्नः ॥

फेणः, पुं, (स्फायते वर्द्धते इति । स्फाय + "फेनमीनौ ।" उणा० ३ । ३ । इति नक् फे-शब्दादेशश्च । मतान्तरे णत्वम् । दन्त्यनान्तपाठस्तु गरीयान् ।) फेनः । तरलद्रव्योपर्य्युत्थितबुद्बुदाकारवस्तु । फेना इति भाषा । यथा,—
"पयःफेणनिभा शय्या दान्ता रुक्मपरिच्छदा ॥"
इति पुराणम् ॥
डिण्डीरः । इत्यमरः । २ । ६ । १०५ ॥ समुद्रफेना इति भाषा । अस्य मूर्द्धन्यणान्तस्य प्रमाणं यथा,—
"हंसश्रेण्यो नदीतीरे निनदैः संप्रतीयिरे ।
यथा सारस्वता मन्त्रा अन्तरे फेणसङ्गताः ॥"
इत्यमरटीकायां रघुनाथचक्रवर्त्ती ॥